IJARSCT

International Journal of Advanced Research in Science, Communication and Technology

International Open-Access, Double-Blind, Peer-Reviewed, Refereed, Multidisciplinary Online Journal

ISSN: 2581-9429

Volume 5, Issue 5, December 2025

Impact Factor: 7.67

# श्रीमद्भगवद्गीतायां शिक्षाविचार:

**तीजराम वर्मा**

शोधच्छात्र: संस्कृत विभागः, पौडी परिसर:

हेमवती नन्दन बहुगुणा गढवाल, विश्वविद्यालय, श्रीनगरं, गढवाल, उत्तराखण्ड

atirtharamji@gmail.com

**विषयसारः-**

श्रीमद्भगवद्गीता वस्तुतो महाभारतस्यैवांश:परं महत्त्वात् पृथक्रूपेण प्रसिद्धम्। महाभारते भीष्मपर्वणि पञ्चविंशतितमादध्यायाद् (२५) द्वाचत्वारिंशत्तमाध्याय: **श्रीमद्भगवद्गीता** इति नाम्ना प्रसिद्धम् । अस्यां गीतायां सप्तशती (७००) श्लोका:सन्ति। तेषु श्लोकेषु चतुस्सप्तत्युत्तरं पञ्च शतं (५७४) श्लोका भगवत: श्रीकृष्णस्योपदेशरूपेण, चतुरशीति: (८४) श्लोका अर्जुनस्य प्रश्नरूपेण, संजयस्य एकचत्वारिंशत् श्लोका:सन्ति। एकः श्लोक: धृतराष्ट्रमुखेन विद्यते। अष्टादशस्वध्यायेषु नवानामध्यायानां प्रथमस्य श्लोकस्य वक्ता श्रीभगवान् । सङ्ख्यादृष्ट्या नवाङ्कःपूर्णसङ्ख्या अर्थात् भगवतो वचनं पूर्णं भवति न तत्र किञ्चिदपि न्यूनता। अर्जुनःसप्तानामध्यायानां प्रथमस्य श्लोकस्य वक्ता। शिक्षणविधौ शिष्यस्य छात्रस्य वा प्रश्ना अधिकाधिकं स्यु:। सद्गुणानां ग्रहणं शिक्षा। शिक्षाया उद्देश्यं भवति - **मुक्तिः**। गुरोः शिक्षकस्य वा मुख्यं कार्यं यद् स शिष्यस्य छात्रस्य वा प्रथमं समस्यां श्रृणुयाद्। शिक्षाया:साफल्यं एतदेव भवति यद् शिष्यश्छात्रो वा गुरुवचनं कर्त्तुम् उद्यतो भवेत् यतो हि गुरुवचनपालने एव शिष्याणां छात्राणां वा कल्याणं वर्तते।

**सङ्केत शब्दः-** श्रीमद्भगवद्गीता, शिक्षा, कर्मयोगः, ज्ञानम्, मुक्तिः।